योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०१२

द्वादशः सर्गः १२

श्रीवसिष्ठ उवाच

एतस्मात्परमाच्छान्तात्पदात्परमपावनात् ।

यथेदमुत्थितं विश्वं तच्छृणूत्तमया धिया ।।१

सुषुप्तं स्वप्नवद्भाति भाति ब्रह्मैव सर्गवत् ।

सर्वात्मकं च तत्स्थानं तत्र तावत्क्रमं श्रृणु ।। २

तस्यानन्तप्रकाशात्मरूपस्यानन्तचिन्मणेः ।

सत्तामात्रात्मकं विश्वं यदजस्रं स्वभावतः ।। ३

तदात्मनि स्वयं किंचिच्चेत्यतामिव गच्छति ।

अगृहीतात्मकं संविदहंमर्शनपूर्वकम् । ४

भाविनामार्थकलनैः किंचिदूहितरूपकम् ।

आकाशादणु शुद्धं च सर्वस्मिन्भाति बोधनम् ।। ५

ततः सा परमा सत्ता सचेतश्चेतनोन्मुखी ।

चिन्नामयोग्या भवति किंचिल्लभ्यतया तथा ।। ६

घनसंवेदना पश्चाद्भाविजीवादिनामिका ।

संभवत्यात्तकलना यदोज्झति परं पदम् ।। ७

सत्तैव भावनामात्रसारा संसरणोन्मुखी ।

तदा वस्तुस्वभावेन त्वनुत्तिष्ठति तामिमाम् ।।

समनन्तरमेवास्याः स्वसत्तोदेति शून्यता ।

शब्दादिगुणबीजं सा भविष्यदभिधार्थदा ।। ९

अहंतोदेति तदनु सह वै कालसत्तया ।

भविष्यदभिधार्थेन बीजं मुख्यजगत्स्थितेः ।। १०

तस्याः शक्तेः परायास्तु स्वसंवेदनमात्रकम् ।

एतज्जालमसद्रूपं सदिवोदेति विस्फुरत् ।। ११

एवंप्रायात्मिका संविद्बीजं संकल्पशाखिनः ।

भवत्यहंकारकणस्ततः स्पन्दतया मरुत् ।। १२

चिदहं तावती व्योमशब्दतन्मात्रभावनात् ।

स्वतो घनीभूय शनैः स्वतन्मात्रं भवत्यलम् ।। १३

भाविनामार्थरूपं तद्बीजं शब्दौघशाखिनः ।

पदवाक्यप्रमाणाख्यं वेदवृन्दं विकासितम् ।। १४

तस्मादुदेष्यत्यखिला जगच्छ्रीः परमात्मनः ।

शब्दौघनिर्मितार्थौघपरिणामविसारिणः ।। १५

चिदेवंपरिवारा सा जीवशब्देन कथ्यते ।

भाविशब्दार्थजालेन बीजं रूपौघशाखिनः ।। १६

चतुर्दशविधं भूतजालमावलितान्तरम् ।

जगज्जठरगर्तौघं प्रसरिष्यति वै ततः ।। १७

असंप्राप्ताभिधाचारा चिज्जवात्प्रस्फुरद्वपुः ।

सा चैव स्पर्शतन्मात्रं भावनाद्भवति क्षणात् ।। १८

पवनस्कन्धविस्तारं बीजं स्पर्शौघशाखिनः ।

सर्वभूतक्रियास्पन्दस्तस्मात्संप्रसरिष्यति ।। १९

तत्रैव चिद्विलासेन प्रकाशोऽनुभवाद्भवेत् ।

तेजस्तन्मात्रकं तत्तु भविष्यदभिधार्थकम् ।। २०

तत्सूर्याग्निविजृम्भादिबीजमालोकशाखिनः ।

तस्माद्रूपविभेदेन संसारः प्रसरिष्यति ।। २१

भावयंस्तनुतामेव रसस्कन्ध इवाम्भसः ।

स्वदनं तस्य सङ्घस्य रसतन्मात्रमुच्यते ।। २२

भाविवारिविलासात्मा तद्बीजं रसशाखिनः ।

अन्योन्यस्वदने तस्मात्संसारः प्रसरिष्यति ।। २३

भविष्यद्रूपसंकल्पनामासौ कल्पनात्मकः ।

संकल्पात्मगुणैर्गन्धतन्मात्रत्वं प्रपश्यति ।। २४

भाविभूगोलकत्वेन बीजमाकृतिशाखिनः ।

सर्वाधारात्मनस्तस्मात्संसारः प्रसरिष्यति ।। २५

चिता विभाव्यमानानि तन्मात्राणि परस्परम् ।

स्वयं परिणतान्यन्तरम्बुनीव निरन्तरम् ।। २६

तथैतानि विमिश्राणि विविक्तानि पुनर्यथा ।

न शुद्धान्युपलभ्यन्ते सर्वनाशान्तमेव हि ।। २७

संवित्तिमात्ररूपाणि स्थितानि गगनोदरे ।

भवन्ति वटजालानि यथा बीजकणान्तरे ।। २८

प्रसवं परिपश्यन्ति शतशाखं स्फुरन्ति च ।

परमाण्वन्तरे भान्ति क्षणात्कल्पीभवन्ति च ।। २९

विवर्तमेव धावन्ति निर्विवर्तानि सन्ति च ।

चिद्वेधितानि सर्वाणि क्षणात्पिण्डीभवन्ति च ।। ३०

तन्मात्रगणमेतत्स्यात्सा संकल्पात्मिका चितिः ।

वेदनात्रसरेण्वाभमनाकारैव पश्यति ।। ३१

बीजं जगत्सु ननु पञ्चकमात्रमेव

बीजं पराव्यवहितस्थितिशक्तिराद्या ।

बीजं तदेव भवतीति सदानुभूतं

चिन्मात्रमेवमजमाद्यमतो जगच्छीः ।। ३२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे जगदुत्पत्तिवर्णनं नाम द्वादशः सर्गः ।। १२ ।।